# Shankara Gita

# શઙ્કરગીતા

## Document Information

Text title : shaMkaragItA

File name : shaMkaragItA.itx

Category : gItA, giitaa, shiva

Location : doc_giitaa

Transliterated by : PSA Easwaran

Proofread by : PSA Easwaran

Description-comments : viShNudharmottara purAna 51-57

Latest update : December 28, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 28, 2022

*sanskritdocuments.org*

# શઙ્કરગીતા

## શઙ્કરગીતાસુ પ્રથમોઽધ્યાયઃ

અથ શ્રીવિષ્ણુધર્મોત્તરે પ્રથમખણ્ડાન્તર્ગતે શઙ્કરગીતાસુ
પ્રથમોઽધ્યાયઃ ॥ ૧॥

માર્કણ્ડેય ઉવાચ ।
કૈલાસશિખરે રમ્યે નાનાધાતુવિચિત્રિતે ।
નાનાદ્રુમલતાકીર્ણે નાનાપક્ષિનિનાદિતે ॥ ૧॥

ગઙ્ગાનિર્ઝરસઞ્જાતે સતતં ચારુનિઃસ્વને ।
દેવદેવં મહાદેવં પર્યપૃચ્છત ભાર્ગવઃ ॥ ૨॥

રામ ઉવાચ ।
દેવદેવ મહાદેવ ગઙ્ગાલુલિતમૂર્ધજ ।
શશાઙ્કલેખાસંયુક્ત જટાભારાતિભાસ્વર ॥ ૩॥

પાર્વતીદત્તદેહાર્ધ કામકાલાઙ્ગનાશન ।
ભગનેત્રાન્તકાચિન્ત્ય પૂષ્ણો દશનશાતન ॥ ૪॥

ત્વત્તઃ પરતરં દેવં નાન્યં પશ્યામિ કઞ્ચન ।
પૂજયન્તિ સદા લિઙ્ગં તવ દેવાઃ સવાસવાઃ ॥ ૫॥

સ્તુવન્તિ ત્વામૃષિગણા ધ્યાયન્તિ ચ મુહુર્મુહુઃ ।
પૂજયન્તિ તથા ભક્ત્યા વરદં પરમેશ્વર ॥ ૬॥

જગતોઽસ્ય સમુત્પત્તિસ્થિતિસંહારપાલને ।
ત્વામેકં કારણં મન્યે ત્વયિ સર્વં પ્રતિષ્ઠિતમ્ ॥ ૭॥

કં ત્વં ધ્યાયસિ દેવેશ તત્ર મે સંશયો મહાન્ ।
આચક્ષ્વ તન્મે ભગવન્ યદ્યનુગ્રાહ્યતા મયિ ॥ ૮॥

પ્રમાદસામ્મુખ્યતયા મયૈતદ્વિસ્રમ્ભમાસાદ્ય જગત્પ્રધાન ।

ભવન્તમીડ્યં પ્રણિપત્ય મૂર્ધ્ના પૃચ્છામિ સઞ્જાતકુતૂહલાત્મા ॥ ૯॥

ઇતિ શ્રીવિષ્ણુધર્મોત્તરે પ્રથમખણ્ડે માર્કણ્ડેયવજ્રસંવાદે
પરશુરામોપાખ્યાને શઙ્કરગીતાસુ રામપ્રશ્નો નામૈકપઞ્ચાશત્તમોઽધ્યાયઃ ॥ ૫૧॥

## શઙ્કરગીતાસુ દ્વિતીયોઽધ્યાયઃ

અથ શ્રીવિષ્ણુધર્મોત્તરે પ્રથમખણ્ડાન્તર્ગતે
શઙ્કરગીતાસુ દ્વિતીયોઽધ્યાયઃ ॥ ૨॥

શઙ્કર ઉવાચ ।
ત્વદુક્તોઽયમનુપ્રશ્નો રામ રાજીવલોચન ।
ત્વમેકઃ શ્રોતુમર્હોઽસિ મત્તો ભૃગુકુલોદ્વહ ॥ ૧॥

યત્તત્પરમકં ધામ મમ ભાર્ગવનન્દન ।
યત્તદક્ષરમવ્યક્તં પારં યસ્માન્ન વિદ્યતે ।
જ્ઞાનજ્ઞેયં જ્ઞાનગમ્યં હૃદિ સર્વસ્ય ચાશ્રિતમ્ ॥ ૨॥

ત્વામહં પુણ્ડરીકાક્ષં ચિન્તયામિ જનાર્દનમ્ ।
એતદ્રામ રહસ્યં તે યથાવત્કથિતં વચઃ ॥ ૩॥

યે ભક્તાસ્તમજં દેવં ન તે યાન્તિ પરાભવમ્ ।
તમીશમજમવ્યક્તં સર્વભૂતપરાયણમ્ ॥ ૪॥

નારાયણમનિર્દેશ્યં જગત્કારણકારણમ્ ।
સર્વતઃ પાણિપાદં તં સર્વતોઽક્ષિશિરોમુખમ્ ॥ ૫॥

સર્વતઃ શ્રુતિમલ્લોકે સર્વમાવૃત્ય તિષ્ઠતિ ।
સાર્વેન્દ્રિયગુણાભાસં સર્વેન્દ્રિયવિવર્જિતમ્ ॥ ૬॥

અસક્તં સર્વતશ્ચૈવ નિર્ગુણં ગુણભોક્તૃ ચ ।
બહિરન્તશ્ચ ભૂતનામચરશ્ચર એવ ચ ॥ ૭॥

સૂક્ષ્મત્વાત્તદવિજ્ઞેયં દૂરસ્થં ચાન્તિકં ચ યત્ ।
અવિભક્તં વિભક્તેષુ વિભક્તમિવ ચ સ્થિતમ્ ॥ ૮॥

ભૂતવર્તિ ચ તજ્જ્ઞેયં ગ્રસિષ્ણુ પ્રભવિષ્ણુ ચ । in BG ભૂતભર્તૃ
જ્યોતિષામપિ તજ્જ્યોતિઃ તમસાં પરમુચ્યતે ॥ ૯॥ in BG તમસઃ

અનાદિમત્પરં બ્રહ્મ ન સત્તન્નાઽસદુચ્યતે ।

પ્રકૃતિર્વિકૃતિર્યોऽસૌ જગતાં ભૂતભાવનઃ ॥ ૧૦॥

યસ્માત્પરતરં નાસ્તિ તં દેવં ચિન્તયામ્યહમ્ ।
ઇચ્છામાત્રમિદં સર્વં ત્રૈલોક્યં સચરાચરમ્ ॥ ૧૧॥

યસ્ય દેવાદિદેવસ્ય તં દેવં ચિન્તયામ્યહમ્ ।
યસ્મિન્ સર્વં યતઃ સર્વં યઃ સર્વં સર્વતશ્ચ યઃ ॥ ૧૨॥

યશ્ચ સર્વમયો દેવસ્તં દેવં ચિન્તયામ્યયમ્ ।
યોગીશ્વરં પદ્મનાભં વિષ્ણું જિષ્ણું જગત્પતિમ્ ॥ ૧૩॥

જગન્નાથં વિશાલાક્ષં ચિન્તયામિ જગદ્ગુરુમ્ ।
શુચિં શુચિપદં હંસં તત્પરં પરમેષ્ઠિનમ્ ॥ ૧૪॥

યુક્ત્વા સર્વાત્મનાऽऽત્માનં તં પ્રપદ્યે જગત્પતિમ્ ।
યસ્મિન્ વિશ્વાનિ ભૂતાનિ તિષ્ઠન્તિ ચ વિશન્તિ ચ ॥ ૧૫॥

ગુણભૂતાનિ ભૂતેશે સૂત્રે મણિગણા ઇવ ।
યસ્મિન્નિત્યે તતે તન્તૌ દૃષ્ટે સ્રગિવ તિષ્ઠતિ ॥ ૧૬॥

સદસદ્ગ્રથિતં વિશ્વં વિશ્વાઙ્ગે વિશ્વકર્મણિ ।
હરિં સહસ્રશિરસં સહસ્રચરણેક્ષણમ્ ॥ ૧૭॥

પ્રાહુર્નારાયણં દેવં યં વિશ્વસ્ય પરાયણમ્ ।
અણીયસામણીયાંસં સ્થવિષ્ઠં ચ સ્થવીયસામ્ ॥ ૧૮॥

ગરીયસાં ગરિષ્ઠં ચ શ્રેષ્ઠં ચ શ્રેયસામપિ ।
યં વાકેષ્વનુવાકેષુ નિષત્સૂપનિષત્સ્વપિ ॥ ૧૯॥

ગૃણન્તિ સત્યકર્માણં સત્યં સત્યેષુ સામસુ ।
ચતુર્ભિશ્ચતુરાત્માનં સત્ત્વસ્થં સાત્ત્વતાં પતિમ્ ॥ ૨૦॥

યં દિવ્યૈર્દેવમર્ચન્તિ મુખ્યૈઃ પરમનામભિઃ ।
યમનન્યો વ્યપેતાશીરાત્માનં વીતકલ્મષમ્ ॥ ૨૧॥

ઇષ્ટ્વાનન્ત્યાય ગોવિન્દં પશ્યત્યાત્મન્યવસ્થિતમ્ ।
પુરાણઃ પુરુષઃ પ્રોક્તો બ્રહ્મા પ્રોક્તો યુગાદિષુ ॥ ૨૨॥

ક્ષયે સઙ્કર્ષણઃ પ્રોક્તસ્તમુપાસ્યમુપાસ્મહે ।
યમેકં બહુધાऽऽત્માનં પ્રાદુર્ભૂતમધોક્ષજમ્ ॥ ૨૩॥

નાન્યભક્તાઃ ક્રિયાવન્તો યજન્તે સર્વકામદમ્ ।
યમાહુર્જગતાં કોશં યસ્મિન્ સન્નિહિતાઃ પ્રજાઃ ॥ ૨૪॥

યસ્મિન્ લોકાઃ સ્ફુરન્તીમે જલે શકુનયો યથા ।
ઋતમેકાક્ષરં બ્રહ્મ યત્તત્સદસતઃ પરમ્ ॥ ૨૫॥

અનાદિમધ્યપર્યન્તં ન દેવા નર્ષયો વિદુઃ ।
યં સુરાસુરગન્ધર્વાસ્સસિદ્ધર્ષિમહોરગાઃ ॥ ૨૬॥

પ્રયતા નિત્યમર્ચન્તિ પરમં દુઃખભેષજમ્ ।
અનાદિનિધનં દેવમાત્મયોનિં સનાતનમ્ ॥ ૨૭॥

અપ્રતર્ક્યમવિજ્ઞેયં હરિં નારાયણં પ્રભુમ્ ।
અતિવાય્વિન્દ્રકર્માણં ચાતિસૂર્યાગ્નિતેજસમ્ ॥ ૨૮॥

અતિબુદ્ધીન્દ્રિયગ્રામં તં પ્રપદ્યે પ્રજાપતિમ્ ।
યં વૈ વિશ્વસ્ય કર્તારં જગતસ્તસ્થુષાં પતિમ્ ॥ ૨૯॥

વદન્તિ જગતોઽધ્યક્ષમક્ષરં પરમં પદમ્ ।
યસ્યાગ્નિરાસ્યં દ્યૌર્મૂર્ધા ખં નાભિશ્ચરણૌ ક્ષિતિઃ ॥ ૩૦॥

ચન્દ્રાદિત્યૌ ચ નયને તં દેવં ચિન્તયામ્યહમ્ ।
યસ્ય ત્રિલોકી જઠરે યસ્ય કાષ્ઠાશ્ચ વાહનાઃ ॥ ૩૧॥

યસ્ય શ્વાસશ્ચ પવનસ્તં દેવં ચિન્તયામ્યહમ્ ।
વિષયે વર્તમાનાનાં યં તં વૈશેષિકૈર્ગુણૈઃ ॥ ૩૨॥

પ્રાહુર્વિષયગોપ્તારં તં દેવં ચિન્તયામ્યહમ્ ।
પરઃ કાલાત્પરો યજ્ઞાત્પરસ્સદસતશ્ચ યઃ ॥ ૩૩॥

અનાદિરાદિર્વિશ્વસ્ય તં દેવં ચિન્તયામ્યહમ્ ।
પદ્ભ્યાં યસ્ય ક્ષિતિર્જાતા શ્રોત્રાભ્યાં ચ તથા દિશઃ ॥ ૩૪॥

પૂર્વભાગે દિવં યસ્ય તં દેવં ચિન્તયામ્યહમ્ ।
નાભ્યાં યસ્યાન્તરિક્ષસ્ય નાસાભ્યાં પવનસ્ય ચ ॥ ૩૫॥

પ્રસ્વેદાદમ્ભસાં જન્મ તં દેવં ચિન્તયામ્યહમ્ ॥ ૩૬॥

વરાહશીર્ષં નરસિંહરૂપં
    દેવેશ્વરં વામનરૂપરૂપમ્ ।
ત્રૈલોક્યનાથં વરદં વરેણ્યં

તં રામ નિત્યં મનસા નતોઽસ્મિ ॥ ૩૭॥

વક્ત્રાદ્યસ્ય બ્રાહ્મણાસ્સમ્પ્રભૂતા
યદ્વક્ષસઃ ક્ષત્રિયાઃ સમ્પ્રભૂતાઃ ।
યસ્યોરુયુગ્માચ્ચ તથૈવ વૈશ્યાઃ
પદ્ભ્યાં તથા યસ્ય શૂદ્રાઃ પ્રસૂતાઃ ॥ ૩૮॥

વ્યાપ્તં તથા યેન જગત્સમગ્રં
વિભૂતિભિર્ભૂતભવોદ્ભવેન ।
દેવાધિનાથં વરદં વરેણ્યં
તં રામ નિત્યં મનસા નતોઽસ્મિ ॥ ૩૯॥

ઇતિ શ્રીવિષ્ણુધર્મોત્તરે પ્રથમખણ્ડે માર્કણ્ડેયવજ્રસંવાદે
શ્રીભાર્ગવરામપ્રશ્ને શઙ્કરગીતાસુ ધ્યેયનિર્દેશો નામ
દ્વિપઞ્ચાશત્તમોઽધ્યાયઃ ॥ ૫૨॥

## શઙ્કરગીતાસુ તૃતીયોઽધ્યાયઃ

અથ શ્રીવિષ્ણુધર્મોત્તરે પ્રથમખણ્ડાન્તર્ગતે શઙ્કરગીતાસુ
તૃતીયોઽધ્યાયઃ ॥ ૩॥

રામ ઉવાચ ।
વરાહં નરસિંહં ચ વામનં ચ મહેશ્વર ।
ત્વત્તોઽહં શ્રોતુમિચ્છામિ પ્રાદુર્ભાવાન્મહાત્મનઃ ॥ ૧॥

શઙ્કર ઉવાચ ।
અદિતિશ્ચ દિતિશ્ચૈવ દ્વે ભાર્યે કશ્યપસ્ય ચ ।
અદિતિર્જનયામાસ દેવાનિન્દ્રપુરોગમાન્ ॥ ૨॥

દિતિશ્ચ જનયામાસ દ્વૌ પુત્રૌ ભીમવિક્રમૌ ।
હિરણ્યાક્ષં દુરાધર્ષં હિરણ્યકશિપું તથા ॥ ૩॥

તતોઽભિષિક્તવાન્ શક્રં દેવરાજ્યે પ્રજાપતિઃ ।
દાનવાનાં તથા રાજ્યે હિરણ્યાક્ષં બલોત્કટમ્ ॥ ૪॥

અભિષિચ્ય તયોઃ પ્રાદાત્સ્વર્ગં પાતાલમેવ ચ ।
પાતાલં શાસતિ તથા હિરણ્યાક્ષે મહાસુરે ॥ ૫॥

ધરાધારા ધરાં ત્યક્ત્વા ખમુત્પેતૂ રયાત્પુરા ।
પક્ષવન્તો મહાભાગ નૂનં ભાવ્યર્થચોદિતાઃ ॥ ૬॥

ધરાધરપરિત્યક્તા ધરા ચલનિબન્ધના ।
યદા તદા દૈત્યપુરં સકલં વ્યાપ્તમમ્ભસા ॥ ૭॥

દૃષ્ટ્વૈવ સ્વપુરં વ્યાપ્તમમ્ભસા દિતિજોત્તમઃ ।
સૈન્યમુદ્યોજયામાસ જાતશઙ્કઃ સુરાન્ પ્રતિ ॥ ૮॥

ઉદ્યુક્તેન સ સૈન્યેન દૈત્યાનાં ચતુરઙ્ગિણા ।
વિજિત્ય ત્રિદશાઞ્જન્યે આજહાર ત્રિવિષ્ટપમ્ ॥ ૯॥

હૃતાધિકારાસ્ત્રિદશા જગ્મુઃ શરણમઞ્જસા ।
દેવરાજં પુરસ્કૃત્ય વાસુદેવમજં વિભુમ્ ॥ ૧૦॥

ત્રિદશાન્ શરણં પ્રાપ્તાન્ હિરણ્યાક્ષવિવાસિતાન્ ।
સંયોજ્યાભયદાનેન વિસસર્જ જનાર્દનઃ ॥ ૧૧॥

વિસૃજ્ય ત્રિદશાન્ સર્વાન્ ચિન્તયામાસ કેશવઃ ।
કિન્નુ રૂપમહં કૃત્વા ઘાતયિષ્યે સુરાર્દનમ્ ॥ ૧૨॥

તિર્યઙ્મનુષ્યદેવાનામવધ્યઃ સ સુરાન્તકઃ ।
બ્રહ્મણો વરદાનેન તસ્માત્તસ્ય વધેપ્સયા ॥ ૧૩॥

નૃવરાહો ભવિષ્યામિ ન દેવો ન ચ માનુષઃ ।
તિર્યગ્રૂપેણ ચૈવાહં ઘાતયિષ્યામિ તં તતઃ ॥ ૧૪॥

એતાવદુક્ત્વા સઙ્ગેન નૃવરાહોઽભવત્પ્રભુઃ ।
ચૂર્ણિતાઞ્જનશૈલાભસ્તપ્તજામ્બૂનદામ્બરઃ ॥ ૧૫॥

યમુનાવર્ત્તકૃષ્ણાઙ્ગઃ તદાવર્તતનૂરુહઃ ।
તદોઘ ઇવ દુર્વાર્યસ્તત્પિત્રા તેજસા સમઃ ॥ ૧૬॥

તત્પ્રવાહ ઇવાક્ષોભ્યસ્તત્પ્રવાહ ઇવૌઘવાન્ ।
તત્પ્રવાહામલતનુસ્તત્પ્રવાહમનોહરઃ ॥ ૧૭॥

સજલાઞ્જનકૃષ્ણાઙ્ગઃ સજલામ્બુદસચ્છવિઃ ।
પીતવાસાસ્તદા ભાતિ સવિદ્યુદિવ તોયદઃ ॥ ૧૮॥

ઉરસા ધારયન્ હારં શશાઙ્કસદૃશચ્છવિઃ ।
શુશુભે સર્વભૂતાત્મા સબલાક ઇવામ્બુદઃ ॥ ૧૯॥

શશાઙ્કલેખાવિમલે દંષ્ટ્રે તસ્ય વિરેજતુઃ ।
મેઘાન્તરિતબિમ્બસ્ય દ્વૌ ભાગૌ શશિનો યથા ॥ ૨૦॥

કરાભ્યાં ધારયન્ ભાતિ શઙ્ખચક્રે જનાર્દનઃ ।
ચન્દ્રાર્કસદૃશે રામ પાદચારીવ પર્વતઃ ॥ ૨૧॥

મહાજીમૂતસઙ્કાશો મહાજીમૂતસન્નિભઃ ।
મહાજીમૂતવદ્વેગી મહાબલપરાક્રમઃ ॥ ૨૨॥

દાનવેન્દ્રવધાકાઙ્ક્ષી હિરણ્યાક્ષસભાં યયૌ ।
હિરણ્યાક્ષોઽપિ તં દૃષ્ટ્વા નૃવરાહં જનાર્દનમ્ ॥ ૨૩॥

દાનવાંશ્ચોદયામાસ તિર્યગ્જાતમપૂર્વકમ્ ।
ગૃહ્યતાં બધ્યતાં ચૈવ ક્રીડાર્થં સ્થાપ્યતાં તથા ॥ ૨૪॥

ઇત્યેવમુક્તઃ સંરબ્ધઃ પાશહસ્તાંસ્તુ દાનવાન્ ।
જિઘૃક્ષમાણાંશ્ચક્રેણ જઘાન શતશો રણે ॥ ૨૫॥

હન્યમાનેષુ દૈત્યેષુ હિરણ્યાક્ષોઽથ દાનવાન્ ।
ચોદયામાસ સંરબ્ધાન્ વરાહાધિકકારણાત્ ॥ ૨૬॥

ચોદિતા દાનવેન્દ્રેણ દાનવાઃ શસ્ત્રપાણયઃ ।
પ્રવવર્ષુસ્તથા દેવં શસ્ત્રવર્ષેણ કેશવમ્ ॥ ૨૭॥

દૈત્યાઃ શસ્ત્રનિપાતેન દેવદેવસ્ય ચક્રિણઃ ।
નૈવ શેકુર્વૃથાકર્તું યત્નવન્તોઽપિ નિર્ભયાઃ ॥ ૨૮॥

હન્યમાનોઽપિ દૈત્યેન્દ્રૈઃ દાનવાન્ મધુસૂદનઃ ।
જઘાન ચક્રેણ તદા શતશોઽથ સહસ્રશઃ ॥ ૨૯॥

હન્યમાનેષુ સૈન્યેષુ હિરણ્યાક્ષઃ સ્વયં તતઃ ।
ઉત્થાય ધનુષા દેવં પ્રવવર્ષ સુરોત્તમમ્ ॥ ૩૦॥

હિરણ્યાક્ષસ્તુ તાન્ દૃષ્ટ્વા વિફલાંશ્ચ શિલીમુખાન્ ।
શિલીમુખાભાન્ સમ્પશ્યન્ સમપશ્યન્મહદ્ભયમ્ ॥ ૩૧॥

તતોઽસ્ત્રૈર્યુયુધે તેન દેવદેવેન ચક્રિણા ।
તાન્યસ્ય ફલહીનાનિ ચકાર ભગવાન્ સ્વયમ્ ॥ ૩૨॥

તતો ગદાં કાઞ્ચનપટ્ટનદ્ધાં વિભૂષિતાં કિઙ્કિણિજાલસઙ્ઘૈઃ ।

ચિક્ષેપ દૈત્યાધિપતિઃ સ ઘોરાં તાં ચાપિ દેવો વિફલીચકાર ॥ ૩૩॥

શક્તિં તતઃ પટ્ટવિનદ્ધમધ્યામુલ્કાનલાભાં તપનીયચિત્રામ્ ।
ચિક્ષેપ દૈત્યસ્સ વરાહકાયે હુઙ્કારદગ્ધા નિપપાત સા ચ ॥ ૩૪॥

તતસ્ત્રિશૂલં જ્વલિતાગ્રશૂલં સ શીઘ્રગં દેવગણસ્ય સઙ્ખ્યે ।
દૈત્યાધિપસ્તસ્ય સસર્જ વેગાદવેક્ષિતઃ સોઽપિ જગામ ભૂમિમ્ ॥ ૩૫॥

શઙ્ખસ્વનેનાપિ જનાર્દનશ્ચ વિદ્રાવ્ય દૈત્યાન્ સકલાન્ મહાત્મા ।
સકુણ્ડલં દૈત્યગણાધિપસ્ય ચિચ્છેદ ચક્રેણ શિરઃ પ્રસહ્ય ॥ ૩૬॥

નિપાતિતે દૈત્યપતૌ સ દેવઃ સમ્પૂજિતઃ શક્રપિતામહાભ્યામ્ ।
મયા ચ સર્વૈસ્ત્રિદશૈઃ સમેતૈર્જગામ કાષ્ઠાં મનસા ત્વભીષ્ટામ્ ॥ ૩૭॥

શક્રોઽપિ લબ્ધ્વા ત્રિદિવં મહાત્મા ચિચ્છેદ પક્ષાન્ ધરણીધરાણામ્ ।
રરક્ષ ચેમાં સકલાં ત્રિલોકીં ધર્મેણ ધર્મજ્ઞભૃતાં વરિષ્ઠઃ ॥ ૩૮॥

ઇતિ શ્રીવિષ્ણુધર્મોત્તરે પ્રથમખણ્ડે શઙ્કરગીતાસુ નૃવરાહપ્રાદુર્ભાવે
હિરણ્યાક્ષવધો નામ ત્રિપઞ્ચાશત્તમોઽધ્યાયઃ ॥ ૫૩॥

## શઙ્કરગીતાસુ ચતુર્થોઽધ્યાયઃ

અથ શ્રીવિષ્ણુધર્મોત્તરે પ્રથમખણ્ડાન્તર્ગતે શઙ્કરગીતાસુ
ચતુર્થોઽધ્યાયઃ ॥ ૪॥

શઙ્કર ઉવાચ ।
હિરણ્યાક્ષે હતે દૈત્યે ભ્રાતા તસ્ય મહાત્મનઃ ।
હિરણ્યકશિપુર્નામ ચકારોગ્રં મહત્તપઃ ॥ ૧॥

દશવર્ષસહસ્રાણિ દશવર્ષશતાનિ ચ ।
જયોપવાસનિરતઃ સ્નાનમૌનાશ્રિતવ્રતઃ ॥ ૨॥

તપઃશમદમાભ્યાં ચ બ્રહ્મચર્યેણ ચાનઘ ।
બ્રહ્મા પ્રીતમનાસ્તસ્ય સ્વયમાગત્ય ભાર્ગવ ॥ ૩॥

વિમાનેનાર્કવર્ણેન હંસયુક્તેન ભાસ્વતા ।
આદિત્યૈસ્સહિતઃ સાધ્યૈસ્સહિતો મરુદશ્વિભિઃ ॥ ૪॥

રુદ્રૈર્વિશ્વસહાયૈશ્ચ યક્ષરાક્ષસપન્નગૈઃ ।
દિગ્ભિર્વિદિગ્ભિશ્ચ તથા ખેચરૈશ્ચ મહાગ્રહૈઃ ॥ ૫॥

નિમ્નગાભિઃ સમુદ્રૈશ્ચ માસર્ત્વયનસન્ધિભિઃ ।
નક્ષત્રૈશ્ચ મુહૂર્તૈશ્ચ કાલસ્યાવયવૈસ્તથા ॥ ૬॥

દેવર્ષિભિઃ પુણ્યતમૈઃ સિદ્ધૈઃ સપ્તર્ષિભિસ્તથા ।
રાજર્ષિભિઃ પુણ્યતમૈર્ગન્ધર્વૈરપ્સરોગણૈઃ ॥ ૭॥

ચરાચરગુરુઃ શ્રીમાન્ વૃતઃ સર્વૈર્દિવૌકસૈઃ ।
બ્રહ્મા બ્રહ્મવિદાં શ્રેષ્ઠો દૈત્યં વચનમબ્રવીત્ ॥ ૮॥

બ્રહ્મોવાચ ।
પ્રીતોઽસ્મિ તવ ભક્તસ્ય તપસાનેન સુવ્રત ।
વરં વરય ભદ્રં તે યથેષ્ટં કામમાપ્નુહિ ॥ ૯॥

હિરણ્યકશિપુરુવાચ ।
ન દેવાસુરગન્ધર્વા ન યક્ષોરગરાક્ષસાઃ ।
ન માનુષાઃ પિશાચા વા હન્યુર્માં દેવસત્તમ ॥ ૧૦॥

ઋષયોઽપિ ન માં શાપં ક્રુદ્ધા લોકપિતામહ ।
શપેયુસ્તપસા યુક્તા વરમેતદ્વૃણોમ્યહમ્ ॥ ૧૧॥

ન શસ્ત્રેણ ન ચાસ્ત્રેણ ગિરિણા પાદપેન ચ ।
ન શુષ્કેન ન ચાઽઽર્દ્રેણ વધં મે સ્યાત્કથઞ્ચન ॥ ૧૨॥

ભવેયમહમેવાર્કઃ સોમો વાયુર્હુતાશનઃ ।
સલિલં ચાન્તરિક્ષં ચ નક્ષત્રાણિ દિશો દશ ॥ ૧૩॥

અહં ક્રોધશ્ચ કામશ્ચ વરુણો વાસવો યમઃ ।
ધનદશ્ચ તથાધ્યક્ષો યક્ષઃ કિમ્પુરુષાધિપઃ ॥ ૧૪॥

બ્રહ્મોવાચ ।
એતે દિવ્યવરાંસ્તાત મયા દત્તાસ્તવાદ્ભુતાઃ ।
સર્વાન્ કામાનિમાંસ્તસ્માત્પ્રાપ્સ્યસિ ત્વં ન સંશયઃ ॥ ૧૫॥

શઙ્કર ઉવાચ ।
એવમુક્ત્વા સ ભગવાન્ જગામાકાશમેવ હિ ।
વૈરાજં દેવસદનં મહર્ષિગણસેવિતમ્ ॥ ૧૬॥

તતો દેવાશ્ચ નાગાશ્ચ ગન્ધર્વા મુનયસ્તથા ।

વરપ્રદાનં શ્રુત્વૈવ પિતામહમુપસ્થિતાઃ ॥ ૧૭॥

દેવા ઊચુઃ ।
વરેણાનેન ભગવન્ વધિષ્યતિ સ નોઽસુરઃ ।
તન્નઃ પ્રસીદ ભગવન્ વધોઽપ્યસ્ય વિચિન્ત્યતામ્ ॥ ૧૮॥

ભગવાન્ સર્વભૂતાનાં સ્વયમ્ભૂરાદિકૃત્પ્રભુઃ ।
સ્રષ્ટા ચ હવ્યકવ્યાનાં ચાવ્યક્તઃ પ્રકૃતિર્ધ્રુવઃ ॥ ૧૯॥

શઙ્કર ઉવાચ ।
સર્વલોકહિતં વાક્યં શ્રુત્વા દેવઃ પ્રજાપતિઃ ।
પ્રોવાચ વરદો વાક્યં સર્વાન્ દેવગણાંસ્તતઃ ॥ ૨૦॥

બ્રહ્મોવાચ ।
અવશ્યં ત્રિદશાસ્તેન પ્રાપ્તવ્યં તપસઃ ફલમ્ ।
તતસ્તસ્ય વધં વિષ્ણુસ્તપસોઽન્તે કરિષ્યતિ ॥ ૨૧॥

શઙ્કર ઉવાચ ।
એવં શ્રુત્વા સુરાઃ સર્વે વાક્યં પઙ્કજજન્મનઃ ।
સ્વાનિ સ્થાનાનિ દિવ્યાનિ જગ્મુસ્તે વૈ મુદાન્વિતાઃ ॥ ૨૨॥

લઘુમાત્રે વરે તસ્મિન્ સર્વાઃ સોઽબાધત પ્રજાઃ ।
હિરણ્યકશિપુર્દૈત્યો વરદાનેન દર્પિતઃ ॥ ૨૩॥

આશ્રમેષુ મહાત્માનો મુનીન્દ્રાન્ સંશિતવ્રતાન્ ।
સત્યધર્મરતાન્ દાન્તાન્ દુરાધર્ષો ભવંસ્તુ સઃ ॥ ૨૪॥

દેવન્ ત્રિભુવનસ્થાંશ્ચ પરાજિત્ય મહાસુરઃ ।
ત્રૈલોક્યં વશમાનીય સ્વર્ગે વસતિ દાનવઃ ॥ ૨૫॥

યદા વરમદોન્મત્તો હ્યાવાસં કૃતવાન્ દિવિ ।
યાજ્ઞિયાન્ કૃતવાન્ દૈત્યાનયાજ્ઞેયાશ્ચ દેવતાઃ ॥ ૨૬॥

આદિત્યવસવો રુદ્રા વિશ્વેદેવાસ્તથાશ્વિનૌ ।
ભૃગવોઽઙ્ગિરસઃ સાધ્યા મરુતશ્ચ સવાસવાઃ ॥ ૨૭॥

શરણ્યં શરણં વિષ્ણુમુપતસ્થુર્મહાબલમ્ ।
દેવં બ્રહ્મમયં વિષ્ણું બ્રહ્મભૂતસનાતનમ્ ॥ ૨૮॥

ભૂતભવ્યભવિષ્યસ્ય પ્રભું લોકપરાયણમ્ ।

નારાયણં વિભું દેવાઃ શરણ્યં શરણં ગતાઃ ॥ ૨૯॥

દેવા ઊચુઃ ।
ત્રાયસ્વ નોઽદ્ય દેવેશ હિરણ્યકશિપોર્વધાત્ ।
ત્વં હિ નઃ પરમો દેવો બ્રહ્માદીનાં સુરોત્તમ ॥ ૩૦॥

પ્રોત્ફુલ્લામલપત્રાક્ષ શત્રુપક્ષક્ષયઙ્કર ।
ક્ષયાય દિતિવંશસ્ય શરણં ત્વં ભવસ્વ નઃ ॥ ૩૧॥

શ્રીભગવાનુવાચ ।
ભયં ત્યજધ્વમમરા અભયં વો દદામ્યહમ્ ।
તથૈવ ત્રિદિવં દેવાઃ પ્રતિપદ્યત માચિરમ્ ॥ ૩૨॥

એષોઽમું સબલં દૈત્યં વરદાનેન દર્પિતમ્ ।
અવધ્યમમરેન્દ્રાણાં દાનવેન્દ્રં નિહન્મ્યહમ્ ॥ ૩૩॥

શઙ્કર ઉવાચ ।
એવમુક્ત્વા સ ભગવાન્ વિસૃજ્ય ત્રિદિવેશ્વરાન્ ।
નારસિંહં વપુશ્ચક્રે સહસ્રાંશુસમપ્રભમ્ ॥ ૩૪॥

પ્રાંશું કનકશૈલાભં જ્વાલાપુઞ્જવિભૂષિતમ્ ।
દૈત્યસૈન્યમહામ્ભોધિબડવાનલવર્ચસમ્ ॥ ૩૫॥

સન્ધ્યાનુરક્તમેઘાભં નીલવાસસમચ્યુતમ્ ।
દેવદારુવનચ્છન્નં યથા મેરું મહાગિરિમ્ ॥ ૩૬॥

સમ્પૂર્ણવક્ત્રદશનૈઃ શશાઙ્કશકલોપમૈઃ ।
પૂર્ણં મુક્તાફલૈઃ શુભ્રૈઃ સમુદ્રમિવ કાઞ્ચનમ્ ॥ ૩૭॥

નખૈર્વિદ્રુમસઙ્કાશૈર્વિરાજિતકરદ્વયમ્ ।
દૈત્યનાથક્ષયકરૈઃ ક્રોધસ્યેવ યથાઙ્કુરૈઃ ॥ ૩૮॥

સટાભારં સકુટિલં વહ્નિજ્વાલાગ્રપિઙ્ગલમ્ ।
ધારયન્ ભાતિ સર્વાત્મા દાવાનલમિવાચલઃ ॥ ૩૯॥

દૃશ્યાદૃશ્યમુખે તસ્ય જિહ્વાભ્યુદિતચઞ્ચલા ।
પ્રલયાન્તામ્બુદસ્યેવ ચઞ્ચલા તુ તડિલ્લતા ॥ ૪૦॥

આવર્તિભિર્લોમઘનૈઃ વ્યાપ્તં વિગ્રહમૂર્જિતમ્ ।
મહાકટિતટસ્કન્ધમલાતપ્રતિમેક્ષણમ્ ॥ ૪૧॥

કલ્પાન્તમેઘનિર્ઘોષજ્વાલાનિઃશ્વાસમારુતમ્ ।
દુર્નિરીક્ષ્યં દુરાધર્ષં વજ્રમધ્યવિભીષણમ્ ॥ ૪૨॥

કૃત્વા મૂર્તિં નૃસિંહસ્ય દાનવેન્દ્રસભાં યયૌ ।
તાં બભઞ્જ તુ વેગેન દૈત્યાનાં ભયવર્ધનઃ ॥ ૪૩॥

ભજ્યમાનાં સભાં દૃષ્ટ્વા નૃસિંહેન મહાત્મના ।
હિરણ્યકશિપૂ રાજા દાનવાન્ સમચોદયત્ ॥ ૪૪॥

સત્ત્વજાતમિદં ઘોરં ચાપૂર્વં પુનરાગતમ્ ।
ઘાતયધ્વં દુરાધર્ષં યેન મે નાશિતા સભા ॥ ૪૫॥

તસ્ય તદ્વચનં શ્રુત્વા દૈત્યાઃ શતસહસ્રશઃ ।
આયુધૈર્વિવિધૈર્જઘ્નુર્દેવદેવં જનાર્દનમ્ ॥ ૪૬॥

નાનાયુધસહસ્રાણિ તસ્ય ગાત્રેષુ ભાર્ગવ ।
વિશીર્ણાન્યેવ દૃશ્યન્તે મૃલ્લોષ્ટાનીવ પર્વતે ॥ ૪૭॥

દૈત્યાયુધાનાં વૈફલ્યં કૃત્વા હત્વા ચ દાનવાન્ ।
કરપાદપ્રહારૈશ્ચ શતશોઽથ સહસ્રશઃ ॥ ૪૮॥

જગ્રાહ વેગાદ્દૈતેયં હિરણ્યકશિપું તતઃ ।
નૃસિંહહેતોર્વિક્રાન્તમસ્ત્રવર્ષમહામ્બુદમ્ ॥ ૪૯॥

વેગેનોત્સઙ્ગમારોપ્ય કદલીદલલીલયા ।
દારયામાસ દૈત્યેશં વક્ષસ્થલમહાગિરિમ્ ॥ ૫૦॥

કૃત્વા તમસુભિર્હીનં દૈત્યેશં કેશવઃ સ્વયમ્ ।
અસુરાણાં વિનાશં ચ ક્રુદ્ધો નરહરિર્વ્યધાત્ ॥ ૫૧॥

હત્વાસુરં શોણિતબિન્દુચિત્રં સમ્પૂજ્ય દેવાઃ સહ વાસવેન ।
જગ્મુઃ સ્વધિષ્ણ્યાનિ મુદા સમેતા દેવોઽપ્યથાન્તર્હિતમૂર્તિરાસ ॥ ૫૨॥

ઇતિ શ્રીવિષ્ણુધર્મોત્તરે પ્રથમખણ્ડે માર્કણ્ડેયવજ્રસંવાદે શઙ્કરગીતાસુ
નરસિંહપ્રાદુર્ભાવો નામ ચતુષ્પઞ્ચાશત્તમોઽધ્યાયઃ ॥ ૫૪॥

## શઙ્કરગીતાસુ પઞ્ચમોઽધ્યાયઃ

અથ શ્રીવિષ્ણુધર્મોત્તરે પ્રથમખણ્ડાન્તર્ગતે શઙ્કરગીતાસુ
પઞ્ચમોઽધ્યાયઃ ॥ ૫॥

શઙ્કર ઉવાચ ।
હતે હિરણ્યકશિપૌ દાનવે દેવકણ્ટકે ।
હતશેષાસ્તુ દૈતેયાઃ પાતાલતલમાશ્રિતાઃ ॥ ૧॥

પાતાલતલસંસ્થેષુ દાનવેષુ મહાયશાઃ ।
પ્રહ્લાદપૌત્રો ધર્માત્મા વિરોચનસુતો બલિઃ ॥ ૨॥

આરાધ્ય તપસોગ્રેણ વરં લેભે પિતામહાત્ ।
અવધ્યત્વમજેયત્વં સમરેષુ સુરાસુરૈઃ ॥ ૩॥

વરલબ્ધં બલિં જ્ઞાત્વા પુનશ્ચક્રુર્દિતેઃ સુતાઃ ।
પ્રહૃષ્ટા દૈત્યરાજાનં પ્રહ્લાદાનુમતેર્બલિમ્ ॥ ૪॥

સમ્પ્રાપ્ય દૈત્યરાજ્યં તુ બલેન ચતુરઙ્ગિણા ।
જિત્વા દેવેશ્વરં શક્રમાજહારામરાવતીમ્ ॥ ૫॥

સ્થાનભ્રષ્ટો મહેન્દ્રોઽપિ કશ્યપં શરણં ગતઃ ।
કશ્યપેન તદા સાર્ધં બ્રહ્માણં શરણં ગતઃ ॥ ૬॥

બ્રહ્મણાઽભિહિતો દેવં જગામ શરણં હરિમ્ ।
અમૃતાધ્માતમેઘાભં શઙ્ખચક્રગદાધરમ્ ॥ ૭॥

દેવોઽપ્યભયદાનેન સંયોજ્ય બલસૂદનમ્ ।
ઉવાચ વચનં કાલે મેઘગમ્ભીરયા ગિરા ॥ ૮॥

શ્રીભગવાનુવાચ ।
ગચ્છ શક્ર ભવિષ્યામિ ત્રાતા તે બલસૂદન ।
દેવરૂપધરો ભૂત્વા વઞ્ચયિષ્યામિ તં બલિમ્ ॥ ૯॥

શઙ્કર ઉવાચ ।
એવમુક્તસ્તદા શક્રઃ પ્રયયૌ કશ્યપાશ્રમમ્ ।
આદિદેશાદિતેર્ગર્ભં ચાંશેનાથ ચ સર્વદા ॥ ૧૦॥

ગર્ભસ્ય એવ તેજાંસિ દાનવેભ્યઃ સ આદદે ।
તતઃ કાલેન સુષુવે અદિતિર્વામનાકૃતિમ્ ॥ ૧૧॥

યસ્મિન્ જાતે સુરગણાઃ પ્રહર્ષમતુલં ગતાઃ ।
ઋષયશ્ચ મહાભાગાસ્ત્રૈકાલ્યામલદર્શિનઃ ॥ ૧૨॥

એતસ્મિન્નેવ કાલે તુ હયમેધાય દીક્ષિતઃ ।
બલિર્દૈત્યપતિઃ શ્રિમાન્ સ્યાલિગ્રામમુપાશ્રિતઃ ॥ ૧૩॥

વામસ્કન્ધે તમાદાય તસ્ય યજ્ઞે બૃહસ્પતિઃ ।
અનયદ્ભૃગુશાર્દૂલ નૂનં  તસ્યૈવ માયયા ॥ ૧૪॥

યજ્ઞવાટં સ સમ્પ્રાપ્ય યજ્ઞં તુષ્ટાવ વામનઃ ।
આત્માનમાત્મના બ્રહ્મન્ ભસ્મચ્છન્ન ઇવાનલઃ ॥ ૧૫॥

પ્રવેશયામાસ ચ તં બલિર્ધર્મભૃતાં વરઃ ।
દદર્શ ચ મહાભાગં વામનં સુમનોહરમ્ ॥ ૧૬॥

સંયુક્તસર્વાવયવૈઃ પીનૈઃ સઙ્ક્ષિપ્તપર્વભિઃ ।
કૃષ્ણાજિનજટાદણ્ડકમણ્ડલુવિરાજિતમ્ ॥ ૧૭॥

વિક્રમિષ્યન્ યથા વ્યાઘ્રો લીયતિ સ્મ સ્વવિગ્રહે ।
વિક્રમિષ્યંસ્તથૈવોર્વી લીનગાત્રઃ સ્વવિગ્રહે ॥ ૧૮॥

એતસ્મિન્નેવ કાલે તુ હયમેધાય દીક્ષિતઃ ।
તસ્માત્તુ પ્રાર્થયદ્રાજન્ દેહિ મહ્યં ક્રમત્રયમ્ ॥ ૧૯॥

એવમુક્તસ્તુ દેવેન બલિર્દૈત્યગણાધિપઃ ।
પ્રદદાવુદકં તસ્ય પાવયસ્વેતિ ચાબ્રવીત્ ॥ ૨૦॥

અન્યચ્ચ યદભીષ્ટં તે તદ્ગૃહાણ દ્વિજોત્તમ ।
પ્રતિજગ્રાહ ચ જલં પ્રવાત્યેવ તદા હરિઃ ॥ ૨૧॥

ઉદઙ્મુખૈર્દૈત્યવરૈઃ વીક્ષ્યમાણ ઇવામ્બુદઃ ।
આક્રમંસ્તુ હરિર્લોકાન્ દાનવાઃ શસ્ત્રપાણયઃ ॥ ૨૨॥

અભિદ્રવન્તિ વેગેન નાનાવક્ત્રશિરોધરાઃ ।
ગરુડાનનાઃ ખડ્ગમુખા મયૂરવદનાસ્તદા ॥ ૨૩॥

ઘોરા મકરવક્ત્રાશ્ચ ક્રોષ્ટુવક્ત્રાશ્ચ દાનવાઃ ।
આખુદર્દુરવક્ત્રાશ્ચ ઘોરવૃકમુખાસ્તથા ॥ ૨૪॥

માર્જારશશવક્ત્રાશ્ચ હંસકાકાનનાસ્તથા ।
ગોધાશલ્યકવક્ત્રાશ્ચ અજાવિમહિષાનનાઃ ॥ ૨૫॥

સિંહવ્યાઘ્રશ◌ૃગાલાનાં દ્વીપિવાનરપક્ષિણામ્ ।
હસ્ત્યશ્વગોખરોષ્ટ્રાણાં ભુજગાનાં સમાનનાઃ ॥ ૨૬॥

પ્રતિગ્રહજલં પ્રાપ્ય વ્યવર્ધત તદા હરિઃ ।
ઉદઙ્મુખૈર્દેવગણૈરીક્ષમાણ ઇવામ્બુદઃ ॥ ૨૭॥

વિક્રમન્તં હરિં લોકાન્ દાનવાઃ શસ્ત્રપાણયઃ ।
મત્સ્યકચ્છપવક્ત્રાણાં દર્દુરાણાં સમાનનાઃ ॥ ૨૮॥

સ્થૂલદન્તા વિવૃત્તાક્ષા લમ્બોષ્ઠજઠરાસ્તથા ।
પિઙ્ગલાક્ષા વિવૃત્તાસ્યા નાનાબાહુશિરોધરાઃ ॥ ૨૯॥

સ્થૂલાગ્રનાસાશ્ચિપિટા મહાહનુકપાલિનઃ ।
ચીનાંશુકોત્તરાસઙ્ગાઃ કેચિત્કૃષ્ણાજિનામ્બરાઃ ॥ ૩૦॥

ભુજઙ્ગાભરણાશ્ચાન્યે કેચિન્મુકુટભૂષિતાઃ ।
સકુણ્ડલાઃ સકટકાઃ સશિરસ્ત્રાણમસ્તકાઃ ॥ ૩૧॥

ધનુર્બાણધરાશ્ચાન્યે તથા તોમરપાણયઃ ।
ખડ્ગચર્મધરાશ્ચાન્યે તથા પરિઘપાણયઃ ॥ ૩૨॥

શતઘ્નીચક્રહસ્તાશ્ચ ગદામુસલપાણયઃ ।
અશ્મયન્ત્રાયુધોપેતા ભિણ્ડિપાલાયુધાસ્તથા ॥ ૩૩॥

શૂલોલૂખલહસ્તાશ્ચ પરશ્વધધરાસ્તથા ।
મહાવૃક્ષપ્રવહણા મહાપર્વતયોધિનઃ ॥ ૩૪॥

ક્રમમાણં હૃષીકેશમુપાવર્તન્ત સર્વશઃ ।
સ તાન્ મમર્દ સર્વાત્મા તન્મુખાન્ દૈત્યદાનવાન્ ॥ ૩૫॥

સરસીવ મહાપદ્માન્ મહાહસ્તીવ દાનવાન્ ।
પ્રમથ્ય સર્વાન્ દૈતેયાન્ હસ્તપાદતલૈસ્તતઃ ॥ ૩૬॥

રૂપં કૃત્વા મહાભીમમાજહારાઽઽશુ મેદિનીમ્ ।
તસ્ય વિક્રમતો ભૂમિં ચન્દ્રાદિત્યૌ સ્તનાન્તરે ॥ ૩૭॥

પરં પ્રક્રમમાણસ્ય નાભિદેશે વ્યવસ્થિતૌ ।
તતઃ પ્રક્રમમાણસ્ય જાનુદેશે વ્યવસ્થિતૌ ॥ ૩૮॥

તતોઽપિ ક્રમમાણસ્ય પદ્ભ્યાં દેવૌ વ્યવસ્થિતૌ ।
જિત્વા સ મેદિનીં કૃત્સ્નાં હત્વા ચાસુરપુઙ્ગવાન્ ॥ ૩૯॥

દદૌ શક્રાય વસુધાં વિષ્ણુર્બલવતાં વરઃ ।

સ્વં રૂપં ચ તથાऽऽસાદ્ય દાનવેન્દ્રમભાષત ॥ ૪૦॥

શ્રીભગવાનુવાચ ।
યજ્ઞવાટે ત્વદીયેऽસ્મિન્ સાલિગ્રામે મહાસુર ।
મયા નિવિષ્ટપાદેન માપિતેયં વસુન્ધરા ॥ ૪૧॥

પ્રથમં તુ પદં જાતં નૌર્બન્ધશિખરે મમ ।
દ્વિતીયં મેરુશિખરે તૃતીયં નાભવત્ક્વચિત્ ॥ ૪૨॥

તન્મે વરય દૈત્યેન્દ્ર યન્મયાऽऽપ્તં પ્રતિગ્રહમ્ ।
બલિરુવાચ ।
યાવતી વસુધા દેવ ત્વયૈવ પરિનિર્મિતા ॥ ૪૩॥

તાવતી તે ન સમ્પૂર્ણા દેવદેવ ક્રમત્રયમ્ ।
ન કૃતં યત્ત્વયા દેવ કુતસ્તન્મે મહેશ્વર ॥ ૪૪॥

ન ચ તદ્વિદ્યતે દેવ તથૈવાન્યસ્ય કસ્યચિત્ ।
શ્રીભગવાનુવાચ ।
ન મે ત્વયાऽપૂર્યતે મે દાનવેન્દ્ર યથાશ્રુતમ્ ॥ ૪૫॥

સુતલં નામ પાતાલં વસ તત્ર સુસંયતઃ ।
મયૈવ નિર્મિતા તત્ર મનસા શોભના પુરી ॥ ૪૬॥

જ્ઞાતિભિઃ સહ ધર્મિષ્ઠૈર્વસ તત્ર યથાસુખમ્ ।
તત્ર ત્વં ભોક્ષ્યસે ભોગાન્ વિશિષ્ટાન્ બલસૂદનાત્ ॥ ૪૭॥

અવાપ્સ્યસિ તથા ભોગાન્ લોકાદ્વિધિવિવર્જિતાન્ ।
પ્રાકામ્યયુક્તશ્ચ તથા લોકેષુ વિહરિષ્યસિ ॥ ૪૮॥

મન્વન્તરે દ્વિતીયે ચ મહેન્દ્રત્વં કરિષ્યસિ ।
તેજસા ચ મદીયેન શક્રત્વે યોક્ષ્યસે બલે ॥ ૪૯॥

તવ શત્રુગણાન્ સર્વાન્ ઘાતયિષ્યામ્યહં તદા ।
બ્રહ્મણ્યસ્ત્વં શરણ્યસ્ત્વં યજ્ઞશીલઃ પ્રિયંવદઃ ॥ ૫૦॥

તપસ્વી દાનશીલશ્ચ વેદવેદાઙ્ગપારગઃ ।
તસ્માદ્યશોભિર્વૃદ્ધ્યર્થં મયા ત્વમભિસન્ધિતઃ ॥ ૫૧॥

દેવરાજાધિકાન્ ભોગાન્ પાતાલસ્થોऽપિ ભોક્ષ્યસે ।
સન્નિધાનઞ્ચ તત્રાહં કરિષ્યામ્યસુરાધિપ ॥ ૫૨॥

મયા ચ રંસ્યસે સાર્ધં સ્પૃહણીયઃ સુરૈરપિ ।
શક્રત્વં ચ તથા કૃત્વા ભાવ્યે સાવર્ણિકેઽન્તરે ॥ ૫૩॥

સર્વસન્ધિવિનિર્મુક્તો મયૈવ સહ રંસ્યસે ॥ ૫૪॥

શઙ્કર ઉવાચ ।
ઇત્યેવમુક્ત્વા સજલામ્બુદાભઃ પ્રતપ્તચામીકરધૌતવસ્ત્રઃ ।
અદર્શનં દેવવરો જગામ શક્રશ્ચ લેભે સકલાં ત્રિલોકીમ્ ॥ ૫૫॥

ઇતિ શ્રીવિષ્ણુધર્મોત્તરે પ્રથમખણ્ડે માર્કણ્ડેયવજ્રસંવાદે શઙ્કરગીતાસુ
વામનપ્રાદુર્ભાવો નામ પઞ્ચપઞ્ચાશત્તમોઽધ્યાયઃ ॥ ૫૫॥

## શઙ્કરગીતાસુ ષષ્ઠોઽધ્યાયઃ

અથ શ્રીવિષ્ણુધર્મોત્તરે પ્રથમખણ્ડાન્તર્ગતે શઙ્કરગીતાસુ
ષષ્ઠોઽધ્યાયઃ ॥ ૬॥

રામ ઉવાચ ।
તસ્ય દેવાદિદેવસ્ય વિષ્ણોરમિતતેજસઃ ।
ત્વત્તોઽહં શ્રોતુમિચ્છામિ દિવ્યા આત્મવિભૂતયઃ ॥ ૧॥

શઙ્કર ઉવાચ ।
ન શક્યા વિસ્તરાદ્વક્તું દેવદેવસ્ય ભૂતયઃ ।
પ્રાધાન્યતસ્તે વક્ષ્યામિ શૃણુષ્વૈકમના દ્વિજ ॥ ૨॥

સર્ગે બ્રહ્મા સ્થિતૌ વિષ્ણુઃ સંહારે ચ તથા હરઃ ।
વરુણો વાયુરાકાશો જ્યોતિશ્ચ પૃથિવી તથા ॥ ૩॥

દિશશ્ચ વિદિશશ્ચાપિ તથા યે ચ દિગીશ્વરાઃ ।
આદિત્યા વસવો રુદ્રા ભૃગવોઽઙ્ગિરસસ્તથા ॥ ૪॥

સાધ્યાશ્ચ મરુતો દેવા વિશ્વેદેવાસ્તથૈવ ચ ।
અશ્વિનૌ પુરુહૂતશ્ચ ગન્ધર્વાપ્સરસાં ગણાઃ ॥ ૫॥

પર્વતોદધિપાતાલા લોકા દ્વીપાશ્ચ ભાર્ગવ ।
તિર્યગૂર્ધ્વમધશ્ચૈવ ત્વિઙ્ગિતં યચ્ચ નેઙ્ગતે ॥ ૬॥

સચ્ચાસચ્ચ મહાભાગ પ્રકૃતિર્વિકૃતિશ્ચ યઃ ।
કૃમિકીટપતઙ્ગાનાં વયસાં યોનયસ્તથા ॥ ૭॥

વિદ્યાધરાસ્તથા યક્ષા નાગાઃ સર્પાઃ સકિન્નરાઃ ।
રાક્ષસાશ્ચ પિશાચાશ્ચ પિતરઃ કાલસન્ધયઃ ॥ ૮॥

ધર્માર્થકામમોક્ષાશ્ચ ધર્મદ્વારાણિ યાનિ ચ ।
યજ્ઞાઙ્ગાનિ ચ સર્વાણિ ભૂતગ્રામં ચતુર્વિધમ્ ॥ ૯॥

જરાયુજાણ્ડજાશ્ચૈવ સંસ્વેદજમથોદ્ભિજમ્ ।
એકજ્યોતિઃ સ મરુતાં વસૂનાં સ ચ પાવકઃ ॥ ૧૦॥

અહિર્બુધ્ન્યશ્ચ રુદ્રાણાં નાદૈવાશ્વિનયોસ્તથા ।
નારાયણશ્ચ સાધ્યાનાં ભૃગૂણાં ચ તથા ક્રતુઃ ॥ ૧૧॥

આદિત્યાનાં તથા વિષ્ણુરાયુરઙ્ગિરસાં તથા ।
વિશ્વેષાં ચૈવ દેવાનાં રોચમાનઃ સુકીર્તિતઃ ॥ ૧૨॥

વાસવઃ સર્વદેવાનાં જ્યોતિષાં ચ હુતાશનઃ ।
યમઃ સંયમશીલાનાં વિરૂપાક્ષઃ ક્ષમાભૃતામ્ ॥ ૧૩॥

યાદસાં વરુણશ્ચૈવ પવનઃ પ્લવતાં તથા ।
ધનાધ્યક્ષશ્ચ યક્ષાણાં રુદ્રો રૌદ્રસ્તથાન્તરઃ ॥ ૧૪॥

અનન્તઃ સર્વનાગાનાં સૂર્યસ્તેજસ્વિનાં તથા ।
ગ્રહાણાં ચ તથા ચન્દ્રો નક્ષત્રાણાં ચ કૃત્તિકા ॥ ૧૫॥

કાલઃ કલયતાં શ્રેષ્ઠો યુગાનાં ચ કૃતં યુગમ્ ।
કલ્પં મન્વન્તરેશાશ્ચ મનવશ્ચ ચતુર્દશ ॥ ૧૬॥

સ એવ દેવઃ સર્વાત્મા યે ચ દેવેશ્વરાસ્તથા ।
સંવત્સરસ્તુ વર્ષાણાં ચાયનાનાં તથોત્તરઃ ॥ ૧૭॥

માર્ગશીર્ષસ્તુ માસાનાં ઋતૂનાં કુસુમાકરઃ ।
શુક્લપક્ષસ્તુ પક્ષાણાં તિથીનાં પૂર્ણિમા તિથિઃ ॥ ૧૮॥

કારણાનાં વધઃ પ્રોક્તો મુહૂર્તાનાં તથાઽભિજિત્ ।
પાતાલાનાં સુતલશ્ચ સમુદ્રાણાં પયોદધિઃ ॥ ૧૯॥

જમ્બૂદ્વીપશ્ચ દ્વીપાનાં લોકાનાં સત્ય ઉચ્યતે ।
મેરુઃ શિલોચ્ચયાનાં ચ વર્ષેષ્વપિ ચ ભારતમ્ ॥ ૨૦॥

હિમાલયઃ સ્થાવરાણાં જાહ્નવી સરિતાં તથા ।
પુષ્કરઃ સર્વતીર્થાનાં ગરુડઃ પક્ષિણાં તથા ॥ ૨૧॥

ગન્ધર્વાણાં ચિત્રરથઃ સિદ્ધાનાં કપિલો મુનિઃ ।
ઋષીણાં ચ ભૃગુર્દેવો દેવર્ષીણાં ચ નારદઃ ॥ ૨૨॥

તથા બ્રહ્મર્ષીણાં ચ અઙ્ગિરાઃ પરિકીર્તિતઃ ।
વિદ્યાધરાણાં સર્વેષાં દેવશ્ચિત્રાઙ્ગદસ્તથા ॥ ૨૩॥

કમ્બરઃ કિન્નરાણાં ચ સર્પાણામથ વાસુકિઃ ।
પ્રહ્લાદઃ સર્વદૈત્યાનાં રમ્ભા ચાપ્સરસાં તથા ॥ ૨૪॥

ઉચ્ચૈઃશ્રવસમશ્વાનાં ધેનૂનાં ચૈવ કામધુક્ ।
ઐરાવતો ગજેન્દ્રાણાં મૃગાણાં ચ મૃગાધિપઃ ॥ ૨૫॥

આયુધાનાં તથા વજ્રો નરાણાં ચ નરાધિપઃ ।
ક્ષમા ક્ષમાવતાં દેવો બુદ્ધિર્બુદ્ધિમતામપિ । ૨૬॥

ધર્માવિરુદ્ધઃ કામશ્ચ તથા ધર્મભૃતાં નૃણામ્ ।
ધર્મો ધર્મભૃતાં દેવસ્તપશ્ચૈવ તપસ્વિનામ્ ॥ ૨૭॥

યજ્ઞાનાં જપયજ્ઞશ્ચ સત્યઃ સત્યવતાં તથા ।
વેદાનાં સામવેદશ્ચ અંશુનાં જ્યોતિષાં પતિઃ ॥ ૨૮॥

ગાયત્રી સર્વમન્ત્રાણાં વાચઃ પ્રવદતાં તથા ।
અક્ષરાણામકારશ્ચ યન્ત્રાણાં ચ તથા ધનુઃ ॥ ૨૯॥

અધ્યાત્મવિદ્યા વિદ્યાનાં કવીનામુશના કવિઃ ।
ચેતના સર્વભૂતાનામિન્દ્રિયાણાં મનસ્તથા ॥ ૩૦॥

બ્રહ્મા બ્રહ્મવિદાં દેવો જ્ઞાનં જ્ઞાનવતાં તથા ।
કીર્તિઃ શ્રીર્વાક્ ચ નારીણાં સ્મૃતિર્મેધા તથા ક્ષમા ॥ ૩૧॥

આશ્રમાણાં ચતુર્થશ્ચ વર્ણાનાં બ્રાહ્મણસ્તથા ।
સ્કન્દઃ સેનાપ્રણેતૄણાં સદયશ્ચ દયાવતામ્ ॥ ૩૨॥

જયશ્ચ વ્યવસાયશ્ચ તથોત્સાહવતાં પ્રભુઃ ।
અશ્વત્થઃ સર્વવૃક્ષાણામોષધીનાં તથા યવઃ ॥ ૩૩॥

મૃત્યુઃ સ એવ મ્રિયતામુદ્ભવશ્ચ ભવિષ્યતામ્ ।
ઝષાણાં મકરશ્ચૈવ દ્યૂતં છલયતાં તથા ॥ ૩૪॥

માનશ્ચ સર્વગુહ્યાનાં રત્નાનાં કનકં તથા ।

ધૃતિર્ભૂમૌ રસસ્તેજસ્તેજશ્ચૈવ હુતાશને ॥ ૩૫॥

વાયુઃ સ્પર્શગુણાનાં ચ ખં ચ શબ્દગુણસ્તથા ।
એવં વિભૂતિભિઃ સર્વં વ્યાપ્ય તિષ્ઠતિ ભાર્ગવ ॥ ૩૬॥

એકાંશેન ભૃગુશ્રેષ્ઠ તસ્યાંશત્રિતયં દિવિ ।
દેવાશ્ચ ઋષયશ્ચૈવ બ્રહ્મા ચાહં ચ ભાર્ગવ ॥ ૩૭॥

ચક્ષુષા યન્ન પશ્યન્તિ વિના જ્ઞાનગતિં દ્વિજ ।
જ્ઞાતા જ્ઞેયસ્તથા ધ્યાતા ધ્યેયશ્ચોક્તો જનાર્દનઃ ॥ ૩૮॥

યજ્ઞો યષ્ટા ચ ગોવિન્દઃ ક્ષેત્રં ક્ષેત્રજ્ઞ એવ ચ ।
અન્નમન્નાદ એવોક્તઃ સ એવ ચ ગુણત્રયમ્ । ૩૯॥

ગામાવિશ્ય ચ ભૂતાનિ ધારયત્યોજસા વિભુઃ ।
પુષ્ણાતિ ચૌષધીઃ સર્વા સોમો ભૂત્વા રસાત્મકઃ ॥ ૪૦॥

પ્રાણિનાં જઠરસ્થોઽગ્નિર્ભુક્તપાચી સ ભાર્ગવ ।
ચેષ્ટાકૃત્પ્રાણિનાં બ્રહ્મન્ સ ચ વાયુઃ શરીરગઃ ॥ ૪૧॥

યથાદિત્યગતં તેજો જગદ્ભાસયતેઽખિલમ્ ।
યચ્ચન્દ્રમસિ યચ્ચાગ્નૌ તત્તેજસ્તત્ર કીર્તિતમ્ ॥ ૪૨॥

સર્વસ્ય ચાસૌ હૃદિ સન્નિવિષ્ટસ્તસ્માત્સ્મૃતિર્જ્ઞાનમપોહનં ચ ।
સર્વૈશ્ચ દેવૈશ્ચ સ એવ વન્દ્યો વેદાન્તકૃદ્વેદકૃદેવ ચાસૌ ॥ ૪૩॥

ઇતિ શ્રીવિષ્ણુધર્મોત્તરે પ્રથમખણ્ડે માર્કણ્ડેયવજ્રસંવાદે
શઙ્કરગીતાસુ વિભૂતિવર્ણનં નામ ષટ્પઞ્ચાશત્તમોઽધ્યાયઃ ॥ ૫૬॥

## શઙ્કરગીતાસુ સપ્તમોઽધ્યાયઃ

અથ શ્રીવિષ્ણુધર્મોત્તરે પ્રથમખણ્ડાન્તર્ગતે શઙ્કરગીતાસુ
સપ્તમોઽધ્યાયઃ ॥ ૭॥

રામ ઉવાચ ।
આરાધ્યતે સ ભગવાન્ કર્મણા યેન શઙ્કર ।
તન્મમાચક્ષ્વ ભગવન્ સર્વસત્ત્વસુખપ્રદમ્ ॥ ૧॥

શઙ્કર ઉવાચ ।
સાધુ રામ મહાભાગ સાધુ દાનવનાશન ।

યન્માં પૃચ્છસિ ધર્મજ્ઞ કેશવારાધનં પ્રતિ ॥ ૨॥

દિવસં દિવસાર્ધં વા મુહૂર્તમેકમેવ વા ।
નાશશ્ચાશેષપાપસ્ય ભક્તિર્ભવતિ કેશવે ॥ ૩॥

અનેકજન્મસાહસ્રૈર્નાનાયોન્યન્તરેષુ ચ ।
જન્તોઃ કલ્મષહીનસ્ય ભક્તિર્ભવતિ કેશવે ॥ ૪॥

નાધન્યઃ કેશવં સ્તૌતિ નાધન્યોઽર્ચયતિ પ્રભુમ્ ।
નમત્યધન્યશ્ચ હરિં નાધન્યો વેત્તિ માધવમ્ ॥ ૫॥

મનશ્ચ તદ્ધિ ધર્મજ્ઞ કેશવે યત્પ્રવર્તતે ।
સા બુદ્ધિસ્તદ્વ્રતાયૈવ સતતં પ્રતિતિષ્ઠતિ ॥ ૬॥

સા વાણી કેશવં દેવં યા સ્તૌતિ ભૃગુનન્દન ।
શ્રવણૌ તૌ શ્રુતા યાભ્યાં સતતં તત્કથાઃ શુભાઃ ॥ ૭॥

અવેહિ ધર્મજ્ઞ તથા તત્પૂજાકરણાત્કરૌ ।
તદેકં સફલં કર્મ કેશવાર્થાય યત્કૃતમ્ ॥ ૮॥

યતો મુખ્યફલાવાપ્તૌ કરણં સુપ્રયોજનમ્ ।
મનસા તેન કિં કાર્યં યન્ન તિષ્ઠતિ કેશવે ॥ ૯॥

બુદ્ધ્યા વા ભાર્ગવશ્રેષ્ઠ તયા નાસ્તિ પ્રયોજનમ્ ।
રોગઃ સા રસના વાપિ યયા ન સ્તૂયતે હરિઃ ॥ ૧૦॥

ગર્તૌ બ્રહ્મવ્રતૌ કર્ણૌ યાભ્યાં તત્કર્મ ન શ્રુતમ્ ।
ભારભૂતૈઃ કરૈઃ કાર્યં કિ તસ્ય નૃપશોર્દ્વિજ ॥ ૧૧॥

યૈર્ન સમ્પૂજિતો દેવઃ શઙ્ખચક્રગદાધરઃ ।
પાદૌ તૌ સફલૌ રામ કેશવાલયગામિનૌ ॥ ૧૨॥

તે ચ નેત્રે મહાભાગ યાભ્યાં સન્દૃશ્યતે હરિઃ ।
કિં તસ્ય ચરણૈઃ કાર્યં કૃતસ્ય નિપુણૈર્દ્વિજ ॥ ૧૩॥

યાભ્યાં ન વ્રજતે જન્તુઃ કેશવાલયદર્શને ।
જાત્યન્ધતુલ્યં તં મન્યે પુરુષં પુરુષોત્તમ ॥ ૧૪॥

યો ન પશ્યતિ ધર્મજ્ઞ કેશવાર્ચાં પુનઃ પુનઃ ।
ક્લેશસઞ્જનનં કર્મ વૃથા તદ્ભૃગુનન્દન ॥ ૧૫॥

કેશવં પ્રતિ યદ્રામ ક્રિયતેઽહનિ સર્વદા ।
પશ્ય કેશવમારાધ્ય મોદમાનં શચીપતિમ્ ॥ ૧૬॥

યમઞ્ચ વરુણઞ્ચૈવ તથા વૈશ્રવણં પ્રભુમ્ ।
દેવેન્દ્રત્વમતિસ્ફીતં સર્વભૂતિસ્મિતં પદમ્ ॥ ૧૭॥

હરિભક્તિદ્રુમાત્પુષ્પં રાજસાત્સાત્ત્વિકં ફલમ્ ।
અણિમા મહિમા પ્રાપ્તિઃ પ્રાકામ્યં લઘિમા તથા ॥ ૧૮॥

ઈશિત્વઞ્ચ વશિત્વઞ્ચ યત્ર કામાવસાયિતા ।
આરાધ્ય કેશવં દેવં પ્રપ્યન્તે નાત્ર સંશયઃ ॥ ૧૯॥

હતપ્રત્યઙ્ગમાતઙ્ગો રુધિરારુણભૂતલે ।
સઙ્ગ્રામે વિજયં રામ પ્રાપ્યતે તત્પ્રસાદતઃ ॥ ૨૦॥

મહાકટિતટશ્રોણ્યઃ પીનોન્નતપયોધરાઃ ।
અકલઙ્કશશાઙ્કાભવદના નીલમૂર્ધજાઃ ॥ ૨૧॥

રમયન્તિ નરં સ્વપ્ને દેવરામા મનોહરાઃ ।
સકૃદ્યેનાર્ચિતો દેવો હેલયા વા નમસ્કૃતઃ ॥ ૨૨॥

વેદવેદાઙ્ગવપુષાં મુનીનાં ભાવિતાત્મનામ્ ।
ઋષિત્વમપિ ધર્મજ્ઞ વિજ્ઞેયં તત્પ્રસાદજમ્ ॥ ૨૩॥

રમન્તે સહ રામાભિઃ પ્રાપ્ય વૈદ્યાધરં પદમ્ ।
અન્યભાવતયા નામ્નઃ કીર્તનાદપિ ભાર્ગવ ॥ ૨૪॥

રત્નપર્યઙ્કશયિતા મહાભોગાશ્ચ ભોગિનઃ ।
વીજ્યન્તે સહ રામાભિઃ કેશવસ્મરણાદપિ ॥ ૨૫॥

સૌગન્ધિકે વને રમ્યે કૈલાસપર્વતે દ્વિજ ।
યદ્યક્ષા વિહરન્તિ સ્મ તત્પ્રાહુઃ કુસુમં નતેઃ ॥ ૨૬॥

રત્નચિત્રાસુ રમ્યાસુ નન્દનોદ્યાનભૂમિષુ ।
ક્રીડન્તિ ચ સહ સ્ત્રીભિર્ગન્ધર્વીભિઃ કથાશ્રુતેઃ ॥ ૨૭॥

ચતુસ્સમુદ્રવેલાયાં મેરુવિન્ધ્યપયોધરામ્ ।
ધરાં યે ભુઞ્જતે ભૂપાઃ પ્રણિપાતસ્ય તત્ફલમ્ ॥ ૨૮॥

તસ્માત્તવાહં વક્ષ્યામિ યદ્યદાચરતઃ સદા ।
પુરુષસ્યેહ ભગવાન્ સુતોષસ્તુષ્યતે હરિઃ ॥ ૨૯॥

પૂજ્યઃ સ નિત્યં વરદો મહાત્મા સ્તવ્યઃ સ નિત્યં જગદેકવન્દ્યઃ ।
ધ્યેયઃ સ નિત્યં સકલાઘહર્તા ચૈતાવદુક્તં તવ રામ ગુહ્યમ્ ॥ ૩૦॥

ઇતિ શ્રીવિષ્ણુધર્મોત્તરે પ્રથમખણ્ડે માર્કણ્ડેયવજ્રસંવાદે
શઙ્કરગીતાસુ ભક્તિફલપ્રદર્શનં નામ સપ્તપઞ્ચાશત્તમોઽધ્યાયઃ ॥ ૫૭॥

Encoded and proofread by PSA Easwaran

*Shankara Gita*

pdf was typeset on December 28, 2022

Please send corrections to *sanskrit@cheerful.com*